त्वात् अर्च्चिरत्न वह्निः ४दीप्तिमात्रे न० "प्रथमादर्चिषामेतदनुद्गोर्स्सुरायुधम्" कुमा० ।

**अर्च्य** त्रि० ऋच—स्तुतौ ण्यत् न कुत्वम् चु० अर्च—यत् वा । पूजनीये प्रानर्च्चुरर्च्यं जगदर्च्चनीयम्" भट्टिः ।

**अर्ज** प्रतियत्ने भ्वादि०पर०सक०सेट् । अर्ज्जति, आर्ज्जीत् आनर्ज अर्जकः अर्जितः अर्जितवान् अर्जित्वा उपार्ज्य अर्जन् । "अर्जकोह्नंग्रथमाहारेत् । दाय०स्मृ० "न तत्पुत्रैर्भजेत्साङ्कमकामः स्वयमर्जितम्" मनुः । "आनर्जुर्न्टभुजोऽस्त्राणि" भट्टिः ।

**अर्ज्ज** संस्कारे चुरा० उभ०सक०सेट् । अर्ज्जयति ते आर्जिजत् त । "अनुपघ्नन् पितृद्रव्यं श्रमेण यदुपार्ज्जयेत्" स्मृतिः "परस्वान्यर्जयन्नारीरन्यदीयाः परामृशन्" भट्टिः । अर्ज्जयितुम् अर्ज्जयित्वा ।

**अर्ज्जक** पु० अर्ज्जयति रज्जुम् अर्ज्ज—ण्वुल् । (वावुइ) इति ख्याते वृक्षे, तत्त्वक्तन्तुना हि रज्जुर्निर्म्मीयते । अर्ज्जनकर्त्तरि त्रि० । "अर्ज्जकोह्नग्रथमाहरेत्" स्मृतिः ।

**अर्जन** न० अर्ज-ल्युट् । १सम्पादने स्वामित्वसम्पादके २व्यापारभेदे च । स्वामित्वहेतवश्च "सप्त वित्तागमाः धर्म्या दायोलाभः क्रयोजयः । विभागः संप्रयोगश्च सत्प्रतिग्रह एव च" स्मृत्युक्ताः "स्वामी रिक्थक्रयसंविभागाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्विष्टं वैश्यशूद्रयोः" गौ० उक्ताश्च रिक्थादयः साधारणाः सर्व्ववर्णेषु । तत्राप्रतिबन्धोदायोरिक्थं यथा पित्रादिधने पुत्रादेः । अप्रतिबन्धोदायोविभागो यथा पत्नीप्रभृतेः । लब्धं प्रतिग्रहः ब्राह्मणस्य तदसाधारणं "याजनाध्यापनप्रतिग्रहैर्ब्राह्मणोधनमर्ज्जयेदिति" श्रुत्या ब्राह्मणकर्त्तृकार्ज्जनस्य याजनादिकरणकत्वनियमनात् । क्षत्रियस्य विजितं विजयलब्धमसाधारणम् । निर्विष्टं भृतिः तच्च वैश्यस्य कृषिगोरक्षादिलब्धम् शूद्रस्य शुश्रूया वेतनं चेति तयोरसाधारणम् । एवञ्च मनुना "सूतानामश्वसारथ्यम्" इत्यादि यदुक्तं तत् सर्व्वं तेषामसाधारणं तदपि निर्विष्टशब्दाभिधेयम्" मिता० शूद्रवत् वर्णसङ्करा इति स्मृतेः "शूद्राणान्तु सधर्म्माणः सर्व्वेऽपध्वंसजा स्मृताः" मनूक्तेश्च तेषां शूद्रधर्म्मातिदेशात्तथा । तच्चार्ज्जनं पुरुषार्थं न यज्ञार्थं तेन यद्यस्य वर्णस्योचितं तदतिरेकेणार्ज्जितेनापि धनेन क्रतुसिद्धिः पुरुषस्य परं नियमातिक्रमे दोषः इति जैमिनीये लिप्सासूत्रे स्थितम् । मिताक्षराकृता तस्य चायमर्थ एवं विवृतः । "यदा द्रव्यार्ज्जननियमानां क्रत्वर्थत्वं तदा-नियमार्जितेनैव द्रव्येण क्रतुसिद्धिरिति न पुरुषस्य नियमातिक्रमदोषः इति पूर्व्वपक्षे सिद्धान्ते तु अर्ज्जननियमस्य पुरुषार्थत्वात् तदतिक्रमेणार्जितेनापि द्रव्येण क्रतुसिद्धिर्भवति पुरुषस्यैव नियमातिक्रमाद्दोष इति नियमातिक्रमार्जितस्यापि स्वत्वमङ्गीकृतम् अन्यथा क्रतुसिद्ध्यभावात् । नचैतावता चौर्य्यादिप्राप्तस्यापि स्वत्वं स्यादिति मन्तव्यम् । लोके तत्र तत्र स्वत्वप्रसिद्ध्यभावात् व्यवहारविसंवादाच्च" इति । एवञ्च प्रतिग्रहाद्युपायकं स्वत्वं लौकिकमेव अतएव "सप्त वित्तागमाधर्म्याः" इत्यनेन तेषां धर्म्महेतुत्वमात्रमुक्तं न तु भृतिप्रभृतीनां तत्रानुक्तानां स्वत्वाहेतुत्वमपि "अर्जयितृव्यापारोऽर्ज्जनमिति" दायभा० । "अर्ज स्वत्वं नापादयतीति" मिता० । "कणिशाद्यर्जनं शिलम्" मनुः । "अर्थानामर्जने दुःखमिति" नीति० अर्जधातोः प्रतियत्नार्थकतया विद्यमानपदार्थस्यैव स्वत्वसम्पादनार्थकत्वेन तस्य तथात्वम् ।

**अर्जुन** पु० अर्ज्ज—उनन् । स्वनामख्याते १वृक्षे, "सोऽङ्गणान्निःसृतः कृष्णः कर्षमाण उदूखलम् । यमलाभ्यां प्रवृत्ताभ्यामर्ज्जुनाभ्यां निवारितः । मध्यान्निश्चक्राम तयोः शिशुः कर्षन्नुदूखलम् । ततस्य कर्षतो बद्धं तिर्य्यग्गतमुदूखलम् । लग्नं ताभ्यां समूलाभ्यामर्ज्जुनाभ्याञ्चकर्षसः । तावर्ज्जुनौ कृष्यमाणौ तेन बालेन वक्षसा । समूलविटपौ भग्नौ स च मध्ये जहास वै" इति हरिवं० । "कदम्बसर्जार्जुननीपकेतकी" ऋतु० । २मध्यमपाण्डवे शुद्धचरितत्वान्मध्यमपाण्डवस्यार्ज्जुनत्वम् । "पृथिव्यां चतुरन्तायां वर्णोमे दुर्लभः समः । करोमि कर्म्म शुद्धञ्च तेन मामर्ज्जुनं विदुः" भा०वि०प० उत्तरं प्रति तस्य स्वनामव्युत्पत्तिकथनम् । स च पाण्डोः क्षेत्रे कुन्त्यां शक्रेण जनितः "एवमुक्ता ततः शक्रमाजुहाव यशस्विनी अथाजगाम देवेन्द्रो जनयामास चार्जुनम् । जातमात्रे कुमारे तु वागुवाचाशरीरिणी । महागम्भीरनिर्घोषा नभोनादयतीव ह । शृण्वतां सर्व्वभूतानां तेषां चाश्रमवासिनाम् । कुन्तीमाभाष्य विस्पष्टमुवाचेदं शुचिस्मिताम् । कार्त्तवीर्य्यसमः कुन्ति ! शिवतुल्यपराक्रमः । एष शक्र इवाजय्यो यशस्ते प्रथयिष्यति । अदित्या विष्णुना प्रीतिर्य्यथाऽभूदभिवर्द्धिता । तथाविष्णुसमः प्रीतिं वर्धयिष्यति तेऽर्जुनः" । भा०आ०प० । "पार्थः कर्णबधाय मार्गणगणान् यानर्ज्जुनः संदधे" लीला० ३हैहयाधिपे कार्त्तवीर्य्ये, "एतस्मिन्नेव काले तु कृतवीर्य्यसुतोबली ।